स्येदं हौत्रमिति प्रकृतिप्रत्ययरूपावयवशक्तिलभ्यार्थयोगबलरूपसमाख्यया हौत्रादिकर्त्तव्यत्वं प्रतीयते। एवं, हौत्रं जुहोति औद्गात्रं जुहोतीत्यादौ” हौत्रादेर्होमकर्तृत्वं प्रतीयते। होता ऋग्वेदी अध्वर्य्युर्यजुर्वेदी उद्गाता सामवेदी “अध्वर्य्यूद्गातृहोतारो यजुःसामर्ग्विदः क्रमादिति” कोषात्। न च समुदाये शक्तिः प्रमाणाभावात् अतएवोक्तं भट्टपादैः “पाकन्तु पचिरेवाह कर्त्तारं प्रत्ययोऽप्यकः। पाकविशिष्टः पुनः कर्त्ता वाच्यो नान्यस्य कस्यचित्”। पाकविशिष्टः पाकविशिष्टः”।

शबरभाष्ये उदा० यथा “अथ प्रकरणस्य क्रमस्य च विरोधे किमुदाहरणम्।। राजसूयप्रकरणेऽभिषेचनीयक्रमे शौनःशेफाख्यानादि आम्नातं, यदि प्रकरणं बलवत् सर्वेषां, तदङ्गम्, यदि क्रमः, अभिषेचनीयस्यैव। किं तावत्प्राप्तम्?—तुल्यबले एते कारणे—इति। कुतः?। न तावत् विशेषमुपलभामहे, नावगच्छाम इदं बलीयः—इति। तस्मात् तुल्यबले एते कारणे—इति। अपि च प्रकरणं वाक्येन बाधितं, तस्मात् बाध्येत क्रमेणापि—इति”। “एवं प्राप्ते ब्रूमः,—प्रकरणं क्रमात् बलीयः। कुतः!। अर्थविप्रकर्षात्। कोऽत्रार्थविप्रकर्षः!। प्रकरणवतः साकाङ्क्षत्वात् तत्सन्निधानाम्नातेन परिपूर्णेनाप्यवकल्प्येत एकवाक्यत्वम्, न तु क्रमवतः, क्रमेण आम्नातेन, अनेकस्याम्नायमानस्य सन्निधिविशेषाम्नानमात्रं हि क्रमः तत्र सन्निधिविशेषाम्नानसामर्थ्यात् क्रमवतः सन्निधावाम्नातस्यानुपलभ्यमानमेव आकाङ्क्षावत्त्वमस्ति—इत्यवगन्तव्यम्। प्रकरणे तु प्रकरणवतः प्रत्यक्षम्, न च प्रकरणवता क्रमवता च यौगपद्येन एकवाक्यता सम्भवत्याम्नातस्य—इति विरोधः। तत्र प्रकरणे प्रत्यक्षं साकाङ्क्षत्वं, क्रमआनुमानिको बाधितुमर्हति। साकाङ्क्षत्वात् एकवाक्यत्वम्, एकवाक्यत्वादभिधानसामर्थ्यं, सामर्थ्यात् श्रुत्यर्थः—इति सन्निकृष्टः प्रकरणस्य श्रुत्यर्थो, विप्रकृष्टः क्रमस्य। तस्मात् क्रमप्रकरणयोः प्रकरणं बलवत्तरम्—इति”।

“अथ यदुक्तं,—वाक्येनापि हि तत् बाधितम्, अतोऽन्येनापि तत् बाधितव्यम्—इति, नैतत्, बाधितस्यानुग्रहो न्याय्यो, न बाधितं बाधितव्यम्—इति”।

“अथ क्रमसमाख्ययोर्विरोधे किमुदाहरणं! किं बलवत्तरम्!—इति। पौरोडाशिकम्—इति समाख्याते काण्डे सान्नाय्यक्रमे “शुन्धध्वं दैव्याय कर्मणे”—इति, शुन्धनार्थो मन्त्रः समाम्नातः। तत्र सन्दिह्यते,—किं समाख्यानस्य बलीयस्त्वात् पुरोडाशपात्राणां शुन्धने विनियोक्तव्यः,(मन्त्रः) उत क्रमस्य बलीयस्त्वात् सान्नाय्यपात्राणाम्?—इति। किं तावत्प्राप्तम्?—तुल्यबले एते कारणे स्याताम्। कुतः? अविशेषात्, यदि वा समाख्यैव बलीयसी, बाधितो हि क्रमः प्रकरणेनापि इति”। “एवं प्राप्ते ब्रूमः,—क्रमो बलीयान्। कुतः?। अर्थविप्रकर्षात्। कः पुनरत्रार्थविप्रकर्षः?। निर्ज्ञाते प्रकरणेन केनापि सहैकवाक्यत्वे यत् सन्निधावाम्नायते, तत्र आकाङ्क्षा परिकल्प्यते, नैकवाक्यतेत्यवगम्यते, लौकिकस्य शब्दः समाख्या, न च, लोक एवंविधेषु अर्थेषु प्रमाणम्। तस्मात् क्रमो बलीयान्”

विवृतमेतत् तत्त्वबोधिन्यां यथा

“स्थानप्रकरणयोर्यथा। पश्विष्टिसोमयागा बहवः परस्परनिरपेक्षा अपि प्रत्येकं फलवन्तः समप्राधान्याः। ते च मिलिता राजसूयः। तन्मध्येऽभिषेचनीयाख्यः कश्चित् सोमयागविशेषः तत्सन्निधौ अक्षदेवनादिकं श्रूयते। यथा “अक्षैर्दीव्यति राजन्यं जिनाति शौनःशेफमाख्यापयतीति” जिनाति जयति। शौनःशेफं बह्वृच ब्राह्मणे आम्नातं शुनःशेफमुनिविषयमुपाख्यानमिति माधवाचार्य्यः। एतेन शुनःशेफमुनेश्चरित्रं पुराणप्रसिद्धमित्युदीच्यव्याख्यानं निरस्तं, वैदिके कर्म्मणि वैदिकोपाख्यानस्यैवोचितत्वाच्च “शौनःशेफं शृणोतीति” पाठकल्पनमपि काल्पनमेव माधवचार्य्यादिभिर्वैदक्षैराख्यापयतीत्यस्य लिखितत्वात्। तत्र च सान्निध्यरूपस्थानबलात् अक्षदेवनादेरभिषेचनीयाङ्गत्वं लभ्यते प्रकरणात्तु सर्व्वयागात्मकराजसूयस्य इति कर्त्तव्यताकाङ्क्षया अक्षदेवनादयो विहिता इति। प्रकरणबलात् राजसूयाङ्गत्वमक्षदेवनादेः राजसूयस्य बहुयागात्मक इति तत्र सर्व्वेषामङ्गत्वं, सर्व्वाङ्गत्वञ्च राजसूयघटकीभूतसर्व्वयागजन्यफलशिरस्का पूर्व्वोपकारद्वारा सर्व्वोपकारकत्वम्। अत्र चाकाङ्क्षायाः कॢप्तत्वाद्वाक्यलिङ्गश्रुतिरूपत्रितयकल्पनं व्यवधानम् अभिषेचनीयस्याक्षदेवनादेराकाङ्क्षा नास्ति तस्य ज्योतिष्टोमविकृतित्वेन प्रकृतिवद्विकृतिन्यायात् अतिदिष्टैः प्रकृतीभूत ज्योतिष्टोमाङ्गैरेवेतिकर्त्तव्यताकाङ्क्षानिवृत्तेरिति सन्निधिपाठबलात् आकाङ्क्षामुत्थाप्य तद्द्वारा वाक्यलिङ्गश्रुतीनां कल्पनीयतया चतुर्भिर्व्यवहितमङ्गत्वज्ञानमिति प्रकरणाद्दिलम्बेन ज्ञापकं स्थानं दुर्व्वलमिति। तस्मात्